वार्त्तिकोक्तिः क्सः । "आसर्व्वनाम्नः ।" ६।३।६१। इत्यत्र "दृक्षे चेति वक्तव्यम् ।" इत्यात्वम् । ) य इव दृश्यते सः । इति मुग्धबोधव्याकरणम् ॥ येमन इति भाषा ॥

यादृशः, त्रि, ( य इव दृश्यते । दृश् + "त्यदादिषु दृशः इति ।" ३।२।६० । इति कञ् । "आसर्व्वनाम्नः ।" ६।३।६१ । इत्याकारादेशः । ) य इव दृश्यते सः । इति मुग्धबोधव्याकरणम् ॥ येमन इति भाषा । (यथा, मनुः । ४ । २५४ ।

"यादृशोऽस्य भवेदात्मा यादृशञ्च चिकीर्षितम् ।
यथा चोपचरेदेनं तथात्मानं निवेदयेत् ॥"

स्त्रियां यादृशी ॥ )

यादोनाथः, पुं, ( यादसां नाथः । ) समुद्रः । इति राजनिर्घण्टः ॥ ( वरुणः । इति यादसांनाथशब्ददर्शनात् ॥ )

यादोनिवासः, पुं, ( यादसां निवासः । ) जलम् । इति हेमचन्द्रः । ४ । १३५ ॥

यानं, क्ली, ( या + ल्युट् । अर्द्धर्चादित्वात् पुंलिङ्गमपि । ) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः । तत्तु उपचितशक्तेः क्षतमूलराष्ट्रस्य शत्रोरास्कन्दनाय यात्रा । इति भरतः ॥ ( यथा, देवीभागवते । ५ । ४ । ११ ।

"यानमप्यधुना नैव कर्त्तव्यं सहसा पुनः ॥"

यात्यनेनेति । या + ल्युट् । ) हस्त्यश्वरथदोलादि । तत्पर्य्यायः । वाहनम् २ युग्यम् ३ पत्त्रम् ४ धोरणम् ५ । इत्यमरः ।२।८।५८॥ विमानम् ६ चक्रम् ७ यापनम् ८ गतिमिच्छकम् ९ । इति शब्दरत्नावली ॥*॥ ( यथा, मनुः । ३ । ६४-६५ ।

"शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ।
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् ।
कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः ॥")

अथ चतुष्पदयानोद्देशः ।

"ये ब्रह्मजात्यादिविभेदतोऽमी
मया निरुक्ता इह वाजिमुख्याः ।
दिशानया सर्व्वचतुष्पदानां
भेदो विधेयो विदुषादरेण ॥
तथा यथाश्वादिकपोषणेन
यानेन वा दोषगुणौ भवेताम् ।
तथा तथैवान्यचतुष्पदानां
प्रकीर्त्तितौ दोषगुणौ बुधेन ॥
वरमयानमपोषणमेव वा
वरमिवान्यशरीरमपोषणम् ।
न खलु दोषयुतं च चतुष्पदं
स्पृशति पश्यति शोभनचेतनः ॥
सुराविन्दुर्दूषयति पयोघटशतं यथा ।
तथा सर्व्वं दूषयति दोषदुष्टचतुष्पदः ॥"

इति चतुष्पदयानोद्देशः ॥ * ॥

अथ द्विपदयानोद्देशः ।

"मानुषैः पक्षिभिर्व्वापि तथान्यैर्द्विपदैरपि ।
यानं स्याद्द्विपदं नाम तस्य भेदो ह्यनेकधा ॥
सामान्यञ्च विशेषश्च तस्य भेदो द्विधा भवेत् ॥"

तत्र सामान्यं यथा,—

"यानं यद्द्विपदाभ्यां सत् तद्दोलादिकमुच्यते ।
चतुर्भिर्युक्तिसंयुक्तैर्दण्डधातुगुणाम्बरैः ।
दोलेति कथ्यते तेषां नियमोऽयं प्रदर्श्यते ॥"

तत्र समयः ।

"उपेन्द्रमूलाश्विशिवाग्निवर्ज्जे
शुक्लेन्दुताराातिथियोगलग्ने ।
हस्तित्वमापुष्यमघाद्यवर्ज्जं
दोलादिकारोहणमाद्यमिष्टम् ॥
दण्डकाष्ठस्य नियमो नियमश्चन्दनस्य वत् ।
कनकं रजतं ताम्रं लौहं धातुचतुष्टयम् ॥
चतुर्विधानामुद्दिष्टं ब्रह्मादीनां यथाक्रमम् ।
सुराणामसुराणाञ्च चातुर्व्वर्ण्यमुदाहृतम् ॥
त्रिहस्तसम्मितो मध्ये तदर्द्धं पार्श्वयोर्द्वयोः ।
विजया नाम दोलेयं विजयाय महीक्षिताम् ॥
विजया मङ्गला क्रूरा शिवा क्षेमा शुभा क्रमात् ।
वितस्त्येकैकसंवृद्ध्या दोलाः षट् स्युः सुखप्रदाः ॥
कुम्भश्च पद्मकोषश्च शङ्खः पर्व्वत एव च ।
चतुर्विधानां दोलासु कल्याणाय चतुष्टयम् ॥
हंसः केकी शुको भृङ्गश्चतुष्टयमिदं क्रमात् ।
कुम्भाद्यग्रे निधातव्यं चतुर्विधमहीक्षिताम् ॥
अत्रापि वर्त्मविन्यासो विज्ञेयो नवदण्डवत् ॥"

भोजस्तु ।

"गजः प्रस्थानदोलायां रणदोलासु केशरी ।
खगो भ्रमणदोलायां क्रीड़ादोलासु षट्पदः ॥
भुजङ्गमः शत्रुराज्ये वृषभो दानकर्म्मणि ।
दोलोपर्य्युपरि न्यस्तो वहुभिर्मुनिशासनम् ॥
यद्वक्रदण्डं यानं स्यात् तत् पर्य्यङ्कमिति स्मृतम् ।
त्रिहस्तसम्मितो यानस्तदर्द्धपरिणाहवान् ।
पर्य्यङ्कः क्षेमनामायं भर्त्तुः सर्व्वार्थसाधकः ॥
क्षेमो स्वल्पजयो दुःखश्चत्वारस्ते यथाक्रमम् ।
वितस्त्येकैकसंवृद्ध्या यथा चापुनं सङ्गिनः ॥
मणिधातुगुणादीनां नियमः पूर्व्ववन्मतः ।
विशेषमथ वक्ष्यामि पर्य्यङ्कस्य यथाक्रमम् ॥
शुक्तिश्च गजदन्तश्च मृगशृङ्गन्तथैव च ।
अनूपादिकजातानां पर्य्यङ्केषु न्यसेत् क्रमात् ॥
पद्मशङ्खगजाश्वालिहंसकोकशुकान् क्रमात् ।
आदित्यादिदशाजानां मणिरूपेण विन्यसेत् ॥
महीन्द्राणां विशेषेण सिंहमानेव शस्यते ।
निर्म्माणे शुक्तिदण्डाश्च राज्यभोगसुखप्रदाः ॥
तदेवावक्रदण्डन्तु खट्टायानमिति स्मृतम् ।
अस्यापि पूर्व्ववन्मानमणिधात्वादिनिर्णयः ॥
विशेषश्चरणोच्छ्रायः परिणाहार्द्धसम्मितः ।
तदेव चेत्रिचरणं पीठयानमिति स्मृतम् ॥
तस्य भेदो द्विधा दण्डवक्रावक्रप्रभेदतः ।
मानादिकं पूर्व्वतुल्यं विशेषाच्चतुरस्रता ॥
एवमन्यानि मिश्राणि यानानि विविधानि च ।
सामान्याख्यानि जानीयात् शिल्पिभिर्निर्म्मि-
तानि वै ॥
मनोहरत्वं लघुता दृढ़तेति गुणत्रयम् ।
प्रोक्तं द्विपदयानानां सहजं भोजभूभुजा ॥
इति सामान्यद्विपदयानकथनम् ॥"

इति युक्तिकल्पतरुः ॥ * ॥ विशेषद्विपदयानन्तु चतुर्दोलशब्दे निष्पदयानोद्देशस्तु नौकाशब्दे द्रष्टव्यम् ॥ (फलप्राप्तिहेतौ, त्रि । यथा, ऋग्वेदे । १० । ११० । २ ।

"तनूनपात् पथ ऋतस्य यानान्
मध्वा समञ्जन् स्वदयासुजिह्व ॥"

"यानान् फलप्राप्तिहेतून् पथो मार्गान् ।" इति तद्भाष्ये सायणः ॥ या + भावे ल्युट् । गतिः । यथा, वाभटे शारीरस्थाने षष्ठेऽध्याये ।

"यानं खरोष्ट्रमार्ज्जारकपिशार्द्दूलसूकरैः ।
यस्य प्रेतैः शृगालैर्वा स मृत्योर्वर्त्तते मुखे ॥")

यानपात्रं, क्ली, (यानसाधनं पात्रम् । शाकपार्थिववत् समासः । ) निष्पदयानविशेषः । जाहाज इति भाषा ॥ तत्पर्य्यायः । वहित्रकम् २ वोहित्थम् ३ वहनम् ४ पोतः ५ । इति हेमचन्द्रः । ३ । ५३९ ॥ समुद्रयानम् ६ । इति वराहपुराणम् ॥ ( यथा, हरिवंशे ।१४५।६३।

"समुच्छ्रितैः सितैः पोतैः यानपात्रैस्तथैव च ।
नौभिश्च भिल्लिकाभिश्च शुशुभे वरुणालयः ॥")

यानमुखं, क्ली, ( यानस्य मुखम् पुरोभागः । ) रथादेः पुरोभागः । तत्पर्य्यायः । धूः २ । इत्यमरः । २ । ८ । ५५ ॥

यापनं, क्ली, ( या + णिच् + ल्युट् । ) वर्त्तनम् । कालक्षेपणम् ॥ ( यथा, कामन्दकीये ।१७।३१।

"पूर्व्वसेनापतिर्नीचः कालयापनमाश्रितः ॥" )

निरसनम् । इति मेदिनी । ने, ११२ ॥ ( यापयतीति । या + णिच् + ल्युः । प्रापके, त्रि । यथा, भागवते । ३ । २२ । ३३ ।

"अयातयामास्तस्यासन् यामाः स्वान्तर-
यापनाः ॥")

यामा, स्त्री, जटा । इति भूरिप्रयोगः ॥

याप्यः, त्रि, (यापि + यत् ।) अधमः । निन्दितः । इत्यमरः ।३।१।५४ ॥ (यथा, वृहत्संहितायाम् । १९ । २२ ।

"यदशुभमशुभेऽब्दे मासजं तस्य वृद्धिः
शुभफलमपि चैवं याप्यमन्योऽन्यतायाम् ॥")

यापनीयः । ( यथा, सुश्रुते निदानस्थाने प्रथमे अध्याये ।

"शोणितं तदसाध्यं स्यात् याप्यं संवत्सरोत्थि-
तम् ॥")

क्षेपणीयकालादिः । इति मेदिनी । ये, ४८ ॥ व्याधिविशेषः । यथा,—

"साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः
स्मृताः ।
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते ॥
याप्यलक्षणमाह ।
यापनीयन्तु तं विद्यात् क्रियां धारयते स्थिताम् ।
क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति ॥
प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम् ।
प्रपतिष्यदिवागारं स्तम्भो यत्नेन योजितः ॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥